"सावित्री प्रसवित्री च वहिर्वाक् मनसीतत:॥ माता। प्रपूर्वकसूधातोः कर्त्तरि तृच् ईप् च ॥

प्रसव्यं, त्रि, (प्रगतं सव्यादिति।) प्रतिकूलम्। इत्यमरः। ३। १। ८४ ॥ प्रदक्षिणम्। यथा, रामायणे। २। ७३। २० ॥

"प्रसव्यञ्चापि तच्चक्रुर्ऋत्विजोऽग्निचितं नृपम्"

प्र+सू+कर्म्मणि यत्। प्रसवनीये च ॥)

प्रसहः, पुं, (प्रसहत इति। प्र+सह्+अच्।) बलात्कारेण भक्षकपक्षी। स च कुररश्येनादिः। यथा,—

"प्रसह्य भक्षयन्त्येते प्रसहास्तेन कीर्त्तिताः ॥"

अस्य मांसगुणाः।

"गुरूष्णमधुराः स्निग्धा वातघ्नाः शुक्रवर्द्धनाः।"

इति राजवल्लभः।

अपि च भावप्रकाशे।

"काको गृध्रं उलूकश्च चिल्लश्च शशघातकः।

चाषो भासश्च कुरर इत्याद्याः प्रसहाः स्मृताः॥"

शशघातकः वाज इति लोके।

"प्रसहाः कीर्त्तिता एते प्रसह्य छिद्य भक्षणात्।

प्रसहाः खलु वीर्य्योष्णास्तन्मांसं भक्षयन्ति ये॥

ते शोषभस्मकोन्मादैः शुक्रक्षीणा भवन्ति हि॥"

प्रसहनः, पुं, (प्रगतं सहनं सह्यगुणो यस्मात्।) हिंस्रपशुः। यथा,—

शार्द्दूलसिंहशरभर्क्षतरक्षुमुख्या

येऽन्यान् प्रसह्य विनिहत्य निवर्त्तयन्ते।

ते कीर्त्तिताः प्रसहनाः पललं तदीय-

मर्शःप्रमेहजठरामयजाड्यहारि ॥"

इति राजनिर्घण्टः ॥

आलिङ्गने, क्ली। यथा,—

"परस्परप्रसहनचुम्बनादिकाः

शुचौ सुखे बहुलविधा भिदा मताः ॥"

इति काव्यप्रकाशटीकाधृतकाव्यकौमुदी ॥ (प्र+सह्+भावे ल्युट्।) सहने, क्ली। तद्वति, त्रि ॥

प्रसहा, स्त्री, (प्र+सह्+अच्। टाप्।) वृहतिका। इति रत्नमाला ॥ (गुणादयोऽस्या बृहतीशब्दे ज्ञातव्याः ॥)

प्रसह्य, व्य, (प्रकर्षेण सोढ़ा इति। प्र+सह्+क्त्वो ल्यप्।) हठार्थकम्। बलात्कारार्थम्। इत्यमरः। ३। ४। १० ॥ (यथा, माघे।१।२७

"प्रसह्य तेजोभिरसङ्ख्यतां गते-

रदस्त्वया नुन्नमनुत्तमं तमः ॥"

प्रसोढुं शक्य इति। प्र+सह्+यत्। प्रकर्षेण सोढुं शक्ये त्रि। यथा, रघुः। १४। ६२।

"ममैव जन्मान्तरपातकानां

विपाकविस्फूर्ज्जथुरप्रसह्यः ॥")

प्रसह्यचौरः, पुं, (प्रसह्य बलात्कारेण चौरः।) हठात् चौर्य्यकारी। डाकाइत इति लुटेरा इति च भाषा ॥ तत्पर्य्यायः। बन्दीकारः २ माचलः ३ चिल्लाभः ४। इति त्रिकाण्डशेषः ॥

प्रसातिका, स्त्री, (षो नाशे + भावे क्तिन्। प्रगता सातिर्नाशो यस्याः। कप्।) अणुव्रीहिः। सूक्ष्मधान्यम्। इति रत्नमाला ॥ (यथा, मार्कण्डेये। ३२। ८ ॥

"श्यामाकराजश्यामाकौ तद्वच्चैव प्रसातिकाः।

नीवाराः पौष्कलाश्चैव धान्यानां पितृतृप्तये ॥"

प्रसादः, पुं, (प्र+सद्+घञ्।) प्रसन्नता। नैर्म्मल्यम्। इत्यमरः। १। ३। १६ ॥ (यथा, "प्रबोधचन्द्रोदये प्रस्तावनायाम् ॥

"कल्पान्तवातसंक्षोभलङ्घिताशेषभूभृतः।

स्थैर्य्यप्रसादमर्य्यादास्ता एव हि महोदधेः ॥")

अनुग्रहः। (यथा, रघुः। २। ६८।

"तस्याः प्रसन्नेन्दुमुखः प्रसादं

गुरुर्नृपाणां गुरवे निवेद्य।

प्रहर्षचिह्नानुमितं प्रियायै

शशंस वाचा पुनरुक्तयेव ॥")

काव्यप्राणः। स्वास्थ्यम्। प्रसत्तिः। इति मेदिनी। दे,३५॥ वैदर्भीरीतियुक्तकाव्यगुणः। तस्य लक्षणम्। ग्राम्यशब्दभिन्नव्यक्तार्थपदवत्त्वम्। यथा,—

"ओजःप्रसादमाधुर्य्यगुणत्रितयभेदतः।

गौड़वैदर्भपाञ्चाला रीतयः परिकीर्त्तिताः।

व्यक्तार्थपदमग्राम्यं प्रसादः परिकीर्त्तितः ॥"

इति काव्यचन्द्रिका ॥ * ॥

(तथा च साहित्यदर्पणे ८ परिच्छेदे।

"चित्तं व्याप्नोति यः क्षिप्रं शुष्केन्धनमिवानलः

स प्रसादः समस्तेषु रसेषु रचनासु च ॥"

देवनिवेदितद्रव्यं गुरूणां भुक्तावशेषश्च। यथा,

"आसीद् शङ्खध्वजो राजा प्रजापालनतत्परः।

प्रसादं सत्यदेवस्य त्यक्त्वा दुःखमवाप सः ॥"

इति स्कान्दे रेवाखण्डे सत्यनारायणव्रतकथा

प्रसादनं, क्ली,(प्रसादयतीति। प्र+सद्+णिच् +ल्युः।) अन्नम्। इति त्रिकाण्डशेषः ॥ (प्र+सद्+णिच्+ल्युट्।) प्रसन्नताकारकम्। यथा, बलवर्णप्रसादनमिति राजवल्लभः ॥ (यथा च महाभारते। ४। ६८। २२।

"प्रसादनं पाण्डवस्य प्राप्तकालं हि रोचये ॥")

प्रसादना,स्त्री, (प्र+सद्+णिच्+युच्+टाप्) सेवा। परिचर्य्या। इति हेमचन्द्रः।३।१६०॥

प्रसाधनं, क्ली, (प्रसाध्यतेऽनेनेति। प्र+साध्+ल्युट्।) वेशः। इत्यमरः। २। ६। ९९ ॥ (यथा, मनुः। २। २११।

"अभ्यञ्जनं स्नापनञ्च गात्रोत्सादनमेव च।

गुरुपत्न्या न कार्य्याणि केशानाञ्च प्रसाधनम् ॥"

कङ्कतिका। इति भरतधृतामरमाला ॥ प्रकृष्टनिष्पत्तिश्च ॥(प्र+साध्+णिच्+ल्युः। प्रसाधयितरि, त्रि। यथा, ऋग्वेदे। १०।५३।२।

"यो यज्ञस्य प्रसाधनस्तं तुर्देवेष्वाततः ॥")

प्रसाधनी,स्त्री,(प्रसाध्यतेऽनयेति। प्र+साध्+ल्युट्। ङीप्।) सिद्धिः। इति मेदिनी।ने,१८५ कङ्कतिका। इत्यमरः। २। ६। १३९ ॥(यथा, सुश्रुते चिकित्सितस्थाने। २४ ॥

"केशप्रसाधनी केश्या रजोजन्तुमलापहा ॥")

तद्युक्तिर्यथा,—

"प्रसाधनी दिङ्नवनागसप्त-

सङ्ख्याभिरुक्ताङ्गुलिभिः क्रमेण।

चतुर्विधानां पृथिवीपतीनां

सम्पत्तिसौभाग्ययशःसमृद्धिदा ॥

काष्ठजा धातुजा चैव शृङ्गजा च यथाक्रमम् ॥

जाङ्गलानूपसामान्यदेशजानां महीभुजाम् ॥

छत्रदण्डवद्ज्ञेयः काष्ठजाया विनिश्चयः।

कनकं रजतं ताम्रं पित्तलं सीसकं तथा॥

लौहं सर्व्वञ्च सर्व्वार्हमादित्यादिदशाभुवाम्।

राज्ञामेवोपयुज्येत कालकीर्त्तिप्रसाधनी ॥

मृगाणां महिषाणाञ्च सिंहजाता प्रसाधनी।

गजदन्तसमुद्भूता राज्ञामेवोपयुज्यते ॥

अत्रापि रत्नविन्यासो यथाम्बरदण्डवत् ॥"

इति युक्तिकल्पतरुः।

प्रसाधिका, स्त्री, (प्रसाध्यति निष्पादयतीति। प्र+साध्+ण्वुल्। टापि अत इत्वम्।) नीवारः। यथा,—

"प्रसाधिका तु नीवारस्तृणान्नमिति च स्मृतम्।"

अस्या गुणाः।

"नीवारः शीतलो ग्राही पित्तघ्नः कफवातकृत्॥"

इति भावप्रकाशः ॥

(प्रसाधयति अलङ्करोतीति।प्र+साध्+णिच् +ण्वुल्।) वेशकारिणी। यथा,—

"प्रसाधिकालम्बितमग्रपाद-

माक्षिप्य काचित् द्रवरागमेव ॥"

इति कुमारसम्भवे सप्तमः सर्गः ॥

(धान्यविशेषः यथा। "अणुव्रीहिः प्रसाधिका।" इति वैद्यकरत्नमालायाम् ॥)

प्रसाधितः, त्रि, (प्र+साधि+क्तः। अलङ्कृतः। इत्यमरः। २। ६। १०० ॥ प्रकृष्टनिष्पन्नः। निष्पादितः। यथा, सारसंग्रहे।

"ततः प्रस्थमितं कल्कं दत्त्वा तोयचतुर्गुणे।

क्षीरे प्रसाधितं तैलं शस्यते बलवर्णकृत् ॥"

प्रसारः, पुं, (प्र+सृ+घञ्।) प्रसरणम्। इति हेमचन्द्रः। ३। ४९८ ॥ (यथा, सुश्रुते।१।२६

प्रसाराकुञ्चनाङ्गूनं निःशल्यमिति निर्द्दिशेत् ॥

प्रसारणं, क्ली, (प्र+सृ+णिच्+ल्युट्।) पञ्चविधकर्म्मान्तर्गतकर्म्मविशेषः। स तु विस्ताररूपः। यथा, भाषापरिच्छेदे।

"उत्क्षेपणं ततोऽवक्षेपणमाकुञ्चनन्तथा।

प्रसारणञ्च गमनं कर्म्माण्येतानि पञ्च च ॥"

(परिवर्द्धनम्। यथा, कामन्दकीयनीतिसारे। १३। ३५।

"मित्रामित्रहिरण्यानां भूमीनाञ्च प्रसारणम्॥"

प्रसारणी, स्त्री, (प्रसार्य्यते इति। प्र+सारि+ल्युट्। ङीप्।) लताविशेषः। गन्धभादालिया इति भाषा ॥ अस्य गुणाः। वातपित्तनाशित्वम्। उष्णत्वम्। बलशुक्रकारित्वञ्च। इति राजवल्लभः ॥ सैन्यानां सर्व्वतो व्याप्तिः। इति प्रसरणशब्दटीकायां भरतः ॥

प्रसारिणी, स्त्री, प्रसरतीति। प्र+सृ+णिनिः ङीप्। लज्जालुलता। प्रसारणी। गन्धभादा-